19. सरस्वतीस्तोत्रम्. पत्र. 3. सं०

1324

6" x 4"

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

इतिश्रीपुस्तकसरस्वतीस्तोत्रम्पत्र ३

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

॥सा०॥
॥१॥

श्रीगणेशायनमः ॥ क्रोंक्रोंक्रोंह्यैकबीजेशशिरुचि
कमलाकल्पविस्पष्टशोभे। भव्येभव्यानुकूलेकुमति
वनदवेविश्ववंद्यांघ्रिपद्मे॥ पद्मेपद्मोपविष्टेप्रणतज
नमनोमोदसंपादयित्रि। प्रोत्सर्पज्ज्ञानकूटेहरिनिजद
यितेदेविसंसारसारे॥१॥ ऐंऐंऐंइष्टमंत्रेकमलभ
वमुखांभोजरूपस्वरूपे॥ रूपारूपप्रकाशेसकलगु
णमयेनिर्गुणेनिर्विकारे॥ नस्थूलेनैवसूक्ष्मेप्यवि ॥रामः॥
दितविषयेनापिविज्ञानतत्त्वे। विश्वेविश्वांतरात्मेसु ॥१॥
रवरनमितेनिष्कलेनित्यशुद्धे॥२॥ क्लींक्लींक्लींजा

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

पत्रच्छेहिमरुचिमुकुटे वल्लकीव्यग्रहस्ते मातंगी मात
र्नमस्ते दह दह जडतां देहि बुद्धिं प्रशस्तां॥ विद्ये वेदांत
गीते श्रुतिपरिपठिते मोक्षदे मुक्तिमार्गे॥ मार्गातीतस्व
भावे भव मम वरदा शारदे शुभ्रहारे॥३॥ धीं धीं धीं
धीरणाख्ये धृतिमतिनुतिभिर्नामभिः कीर्तनीये।
नित्ये नित्ये निमित्ते मुनिगणनमिते नूतने वै पुराणे।
पुण्ये पुण्यप्रवाहे हरिहरनमिते नित्यशुद्धे सुवर्णे।
मात्रे मात्रार्द्धतत्त्वे गतिमतिमति हेमचवप्रीति हाने॥४॥
ह्रीं ह्लीं श्रीं क्रीं स्वरूपे दह दह दुरितं पुस्तकं व्यग्रहस्ते।

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

॥ सा० ॥ संतु प्राकारश्चित्ते स्मितमुखि सुभगं जृंभ विध्वंसि
विद्ये ॥ मुग्धे मुग्धप्रबोधे मम कुरु कुमति ध्वांत विध्वं
समीड्ये ॥ गीर्वाग्नी भारती त्वं कविवृषरसनासिद्
॥ २ ॥ हासिद्धसाध्या ॥ ५ ॥ स्तोमि त्वां त्वां च वंदे भज मम रस
नां मा कदाचित्त्यजेथा ॥ मा मे बुद्धिर्विरुद्धा भवतु न
च मनो यातु मे देवि पापम् ॥ मा मे दुःखं कदाचिद्विप
दि च समयेप्यस्तु मे नाकुलत्वं ॥ शास्त्रे वादे कवित्वे प्र ॥ रामः ॥
सरतु मम धीर्मास्तु कुंठा कदाचित् ॥ ६ ॥ इत्येतैः श्लो ॥ २ ॥
कमुख्यैः प्रतिदिनमुषसि स्तौति यो भक्तिनम्रो ॥ वा

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

णी वाचस्पतेरप्यतिमतिविभवो वाक्पटुर्नष्टपंकः ॥
सः स्यादिष्टार्थलाभी सुतमिव सततं सा च तं पातु दे-
वी ॥ सौभाग्यं तस्य लोके प्रसरति कविताविभ्रमस्तं प्रया-
ति ॥ १८ ॥ ब्रह्मचारी व्रती मौनी त्रयोदश्यां निरामि-
षः ॥ सारस्वतो नरः पाठाद्भवेदिष्टार्थलाभवान् ॥
१९ ॥ पक्षद्वयेपि यो भक्त्या त्रयोदश्येकविंशतिम् ।
अविच्छेदं पठेद्धीमान् ध्यात्वा देवीं सरस्वतीम् ।
शुक्लांबरधरां देवीं शुक्लाभरणभूषिताम् ।
वांछितं फलमाप्नोति सकलं नात्र संशयः ॥ २० ॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri

॥साव॥

॥३॥

इतिब्रह्मास्वयंप्राहसरस्वत्यास्तवंशुभम्॥ प्रयेन
पठेन्नित्यंसोमृतत्वंप्रयच्छति॥१२॥ इतिश्रीब्र
ह्मपुराणेसरस्वतीस्तोत्रम्॥ समाप्त॥ शुभं॥ ※॥
श्रीसंवत्॥ १८२२॥ शके॥ १६८७॥ राम॥
छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥
थं॥ थं॥ थं॥ थं॥ थं॥ थं॥ थं॥ थं॥
राम॥ राम॥ राम॥ राम॥ राम॥ राम॥ राम॥ ॥रामः॥

॥३॥

CC-0 Uma Raman Jha Collection. Digitized by eGangotri